६.२६००

Shri Raghunatha Temple MSS. Library,
JAMMU

(6)

No. ३२ ग-१

Title शुकाष्टकव्याख्यानम्

Author गङ्गाधरेन्द्र सरस्वती

Extent ६ पत्र Age सं. १९८८

Subject वेदान्त

नं. ३२ ग-१

ॐ श्रीगणेशाय नमः ॥ आनंदसिंधुमग्नमग्नरमद्वितीयमात्मानमच्युतशिवं स्वगुरुं प्रणम्य । कुर्वे समस्तजननिर्वृ-
तिसौख्यसिद्ध्यै श्रीमच्छुकाष्टकमतरजविबोधमात्रं १ इह खल्वनेकजन्मसंचितानंतसुकृतपरिपाकवशात्क्षी-
णसर्वरागादिदोषविशुद्धांतःकरणोऽनेकजन्मानुष्ठितनित्यनैमित्तिकादिसत्कर्मोपासनक्रमार्जितविवेक-
वैराग्यशमदमादिसाधनसंपन्नो मुमुक्षुर्मोक्षसाधनैः तरति शोकमात्मविदिति श्रुति बोधितैः । आत्मतत्त्व-
ज्ञाने समुदिताभिलाषः प्रागजन्मन्यस्मिन्नपि श्रवणमननिदिध्यासनैर्बलवत्तरप्रतिबंधादनुत्पन्नतत्त्व-
साक्षात्कारः संपरेतः प्राप्य पुण्यकृतांल्लोकानित्यादि भगवद्दर्शितदिशा शुचीनां श्रीमतां ज्ञानविज्ञानयो-
श्रा॰ गैश्वर्यसंपन्नानां वा शिष्याणां कुले साक्षाद्भगवतो हरेर्लीलावतारेण भगवता बादरायणेन तपोध्या-

भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे मायामोहौ क्षयमधिगतौ नष्टसंदेह-
वृत्तेः शब्दातीतं त्रिगुणर —— वं प्राप्य तत्त्वावबोधं निस्त्रैगुण्ये पथि विचरतः को
विधिः को निषेधः १

नसमर्हणात्प्रसादितस्य भगवतो महेश्वरस्य वरप्रभावात् शुकत्वेनावतीर्णः श्रीमच्छुकाचार्यः स्वर्वात्मतत्त्व-
बोधस्य प्रतिबंधहतये । स्वत एवोत्पन्नेष्वखिलतत्त्वदर्शनज्ञानकोपदेशात् संवादतः स्वानुभवात्करतलामलकवद-
परोक्षीकृतात्मतत्त्वः कृतार्थतमः कृतकार्यो विधिनिषेधपारत्रिगुणः प्रवृत्तौ प्रयोजनाभावादेवास्य कास्म-
कर्मापवर्जिष्यन्नेव निश्चयमानात्मभिः स्वहृद्भिः कर्मठैर्विधिनिषेधविषयप्रवृत्तिनिवृत्त्योरनुनीयमानैर्बध्यमा-
नैस्तथा मन्यमानैर्विवेकादयापन्नतत्त्वविदामिमे के कर्षविधुरतां ज्ञानप्रभाववशान्नमुखेन दर्शयन्त्याह धारित-
मात्मतत्त्वस्वपदिपानि भेदाभेदावित्यादिना त्रिभिः सत्वरजस्तमः संज्ञैः गुणैः रहितं त्रिगुणातीतं कथास-
कार्याविद्याशक्त्या रहितमिति यावत् अतएव शब्देभ्यो लौकिकेभ्यो वैदिकेभ्यश्चातीतं अतिक्रांतं न दविष

यमित्यर्थः पंचविधा हि शब्दाः जातिवचना गुणवचनाः क्रियावचनाः संज्ञाभूताः तेवं धमशब्दाश्चेति
यथा गौः शुक्लः धावति मद्रकः भारवाह इति ज्ञात्वा द्रव्यस्य त्रैगुण्यविषये एव शब्दाः नाविस्त्रैगुण्ये इति
शब्दप्रवृत्तिनिमित्ताभावाच्छब्दातीतमव्याविपंचत्वादबोध्यं तत्त्वमबाधितवस्तु तद्रूपं आगतो बोधो वेदो व
धः साक्षात्कारवृत्तौ द्वस्वप्रकाशस्वराभिच्चिदानंदैकरसं भूमा स्वं प्राप्य ब्रह्मविद्भूतकंठ चामीकरन्याये
वो नैध मात्रेण तद्ज्ञानस्य संदेहवृत्तेः सर्वसंदेहभूताऽज्ञाननाशादेव नष्ट इत्यानिष्ठसाधनहृदयो ब्राह्मगोचर बीजः
संदेहवृत्तयो यस्य अत एव निस्त्रैगुण्यो भवेति त्रैगुण्याप्रलाभसाविषयितो राजसाः कर्मिणः सोत्रिकाउं
पासकाश्च यस्मात्तपा विधे निर्विकल्पपरमसमाधिरूपे तन्मययोगभूमिकालं नतो यथाविचरतुः स्वयं
दंवितरत्तो ममवारविधिः अवरग्निहोत्रादिककर्म प्रवर्तयेत्को वा निषेधो नैष्कर्म्यस्वरूपावस्थिते
निवर्तयेत् न कश्चिदपि तत्समर्थ इत्यर्थः ये हि त्रैगुण्यविषयिका देहाद्यहंभावाः अपायफलरागिणः पा
यफलभीरवः साध्यसाधनेतिकर्तव्यताभेददर्शिनः कर्तृभोक्तृस्वभावमात्मानं मन्यमानाः स्वप्रकाशा
च्चिदानंदाद्वयब्रह्मात्मभावाऽदर्शिनस्तान्प्रति श्रुतिः स्वफलकीर्तनेन रागभयोद्दीपनपुरस्सरं तत्तत्साधनेषु प्रव
र्तयेन्निवर्तयेद्वा विधिनिषेधौ वशीकुर्वतां न तु मां यतो मम तद्वस्तु भेदाभेदौ भेदश्चाभेदश्च भेदाभेदौ
प्रतिदेहं मोमकल्पितभ्रान्तभेदः ...देहादौ तादात्म्याध्यासलक्षणोऽभेदश्च तौ हि सर्वात्मत्वाभि
मानादिद्वारा सर्वानर्थहेतु संपादितत्वसाक्षात्कारसमकालमेव गलितौ यावद्धि भेदस्तावदेव भयारतिरागद्वे प्रति
षादय द्वितीयाद्वै भयं भवति मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति यथोदकं दुर्गे वृष्टं पर्वतेषु विधाव
ते ति एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशु
रेवं स देवानां सैवैनं वरेमत्स द्वितीयमैच्छत् सोऽकामयत जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कु

वीर्येत्येतावान्वै काम इत्यादिश्रुतिभ्यः ॥ एवं देहाद्यभिन्नात्मदर्शनमप्यनर्थहेतुः अयं लोको नास्ति पर इति मानी पुनः पु
नर्वशमापद्यते मे इत्यादिस्मृत्युक्तवचनात् स्मृतिरपि देहाभिमानाद्यत्यापनतः ब्रह्मवधकोटिभिः प्रायश्चित्तार्हं वेच्छु
२ च्छिन्नेस्तां गोवधकारिणां देहाभिमानिनां पुंसां प्रायश्चित्तं न विद्यते इति अत एव हि उपायपापे पुरायं धर्मजिज्ञा
2 न जन्यमपूर्वं पापमधर्मजिज्ञासा न जन्यमपूर्वं ते अपि विशीर्णे शिलाप्रहतलोष्टवद्विध्वस्ते तदाधिनमे उत्तरपूर्वा पांठपिंडः
घयोरश्लेषविनाशाविति सूत्रवचनात् तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतेत्यादिश्रुतेश्च तत्कृतः यतो मायामो
होद्वयमधिगतौ अद्वितीयपूर्णसच्चिदानंदब्रह्मात्मस्वरूपतिरोधायकावरणशक्तिप्रधानाऽविद्या मायातु आवृत
स्वतस्येवान्यथा प्रतिभासननिमित्तविक्षेपशक्तिप्रधाना एकस्या एवाविद्यायास्तमोगुणप्रधानोंऽश आवरकत्वात्
मोह इत्युच्यते रजोगुणप्रधानोंऽशः विक्षेपहेतुत्वान्मायेति तौ मायामोहौ सत्त्वोत्कर्षयुक्तशमदमादिसंपत्तिपू
र्वकेनात्मतत्त्वसाक्षात्कारेणाज्ञानं सह कार्येणात्यंतिकबाधमधिगतौ प्राप्तौ तथा च विधिनिषेधशास्त्रयोः सर्व
प्रमाणानामेव व्यवहारस्याविद्यावद्विषयत्वान्निरस्ताविद्यस्य पूर्णानंदाद्वितीयब्रह्मभूतस्य मम नो विधिनि
षेधशास्त्रविषयत्वमित्येतत्सिद्धमिति भावः १ ॐ श्रीगुरुभ्यो नमः आत्मतत्त्वज्ञानेनो विधिनिषेधगोचरः प्र
वृत्तिनिवृत्तिविषयसाध्यसाधनेतिकर्तव्यतादि सर्वद्वैतोपमर्दात्तस्य विधिनिषेधानाक्रमणीयत्वमित्या
ह यदेति प्रकारांतरेणोक्तार्थोपपत्तिद्योतनार्थं ननु भेदाभेदयोर्बोधमात्रात्कथं निवृत्तिः तत्त्वज्ञानस्यास
त्यार्थनिवर्तनासामर्थ्यात् नहि बोधमात्राद्वस्तुतो भिन्नोऽप्यभिन्नत्वमापद्यते भेदश्च प्रतिशरीरमात्मनां सु
खदुःखव्यवहारव्यवस्थादर्शनात् लोकतः शास्त्रतश्च समधिगम्यते ऐकात्म्ये हि एकस्य सुखे दुःखे
वा सर्वे सुखिनो दुःखिनो वा स्युः तथा च भगवता गोतमेनाप्युक्तं ॥ नानात्मानो व्यवस्थात इति लौकि
कवैदिकादिव्यवहारव्यवस्था चैकात्म्ये नोपपद्यते नहि मित्रोदासीनमध्यस्थादिगोचरो रागद्वेषो श्र.क.
२

यद्वात्मानं सकलवपुषामेकमंतर्वहिस्थं दृष्ट्वा पूर्णं खमिव सततं सर्वभांडस्थमेकं
नान्यत्कार्यं किमपि च यतः कारणाद्भिन्नरूपं निस्त्रैगुण्योप० २

पंचादिश्रुत्युक्तो लोकसंमतो व्यवहारः परदारपरद्रव्यपरद्रोहादिवर्जनविषयः आचार्यपितृव्रह्मयज्ञगमनरक्षणादि विषयः श्रौतः स्मार्त्तश्च व्यवहारो व्यवस्थित उपपद्यते तस्मान्नानात्मत्वमेवेत्याशंकामपाकुर्वन्नाह सकलवपुषामेकमिति सकलवपुषां जरायुजांडजस्वेदजोद्भिज्जाऽऽख्यतैजसवायव्यमानसप्रभेदादष्टधा भिन्नानां शरीराणामंतर्वहिस्थं एकमभिन्नमित्यर्थः अयंभावः न तावद्देहादेः सत्यता प्रमाणावेद्यत्वे सति वेद्यत्वात् शुक्तिरूप्यादिवत् यथा च भेदस्य प्रमाणावेद्यत्वं तथोपपादितमस्माभिः स्वाराज्यसिद्धौ एवमात्मनो देहेन्द्रियादितादात्म्यलक्षणोऽभेदोऽपि प्रमाणावेद्यः स्वात्मनि नानात्वाननुभवात् देहादीनां च नानात्वात् वाल्याद्यवस्थाभेदेनाध्यवाधितदिना देहेन्द्रियादिव्यभिचारेणात्मन्यवाधितप्रत्यभिज्ञयैकत्वनिश्चयेन तैः सर्वैस्तादात्म्याभेदायोगात् एकैकतादा ल० ५
त्म्यविनिगमनाविरहादनिरेकत्वसिद्धेरिति ननु कथं सकलवपुषामेकात्मा महिवालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः एषोऽणुरात्मा चेतसा वेदितव्य इत्यादिश्रुतिभिरणुत्वनाडीप्रवेशप्रवर्तनशालिंगैश्चाणुपरिमाणो विज्ञायते यदा च सर्वांगीणशैत्याद्युपलंभात्समः प्लुषिणा समो मशकेन समो नागेनेत्याद्यश्रुत्या च देहपरिमाणोऽभ्युपगम्यते तत्राविदेहपर्यंतमालविधिनव्यक्तिर्न सकलवपुषामेकः स इत्याशंक्याह अंतर्वहिस्थमिति देहस्यांतर्वहिश्च स्थितं विभुमित्यर्थः नित्यं विभुं सर्वगतं सुसूक्ष्मं आत्मैवाधस्तादात्मोपरिष्टाद्ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेणेत्यादिश्रुतेः सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवमित्यादिस्मृतेरेकात्म्यश्रुतेः किंत्वाकाशवत्सौक्ष्म्यात् दुर्लक्ष्यत्वमभिप्रायाप्राया वालाग्रेत्यादिश्रुतिरपि वाक्यशेषानुरोधात् अणुत्वं तदनुरोधाच्चोपाधिकपरिच्छेदानुवादिनीति तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञ

लिंगस्याणुत्वेऽपि परिच्छिन्नत्वासिद्धिरिति भावः अणुपरिमाणतानादि
अणुपरिमाणत्वे निश्चितश्रुतिः ५ प्र० ७६
वक्ष्यमाणस्य बालाग्रशतभागस्य पं० = २

सू० यदिति॰ सूत्रे॰ बादरायणादिभिर्व्यवस्थापिता ऽौपाधिकविधेरादेवविधेरेव भ्रान्त्ययोगोऽप्युपपन्न॰ इतिन वास्तवात्मै
२ क्यस्य तेन बाधः एतेन शास्त्रीयोप्यात्मभेदव्यवहारार्थ क्रियादिभेदोऽन्तःकरणाद्युपाधिभिरेवोपपादनीयः
यदैकस्यैवाकाशस्य घट घटिपाद्युपाधिभेदादेव सौवर्ण वंधनजलाहरणाद्यान्यावपनाद्यर्थ
3 क्रियाणाम संकरस्तत्तत्कार्याणां तुल्यवच्छेदभेदाच्छेत्रनानात्वादिव्यवस्था च तद्वत्॰ व्यवस्थोपपत्तेरित्या
शयेन दृष्टान्तमाह स्वाप्नवेति एतेनैकस्य दुःखे सर्वेषां तत्प्रसंगो विनिरस्त इति नानात्मानो व्यवस्थातः इति
हेतुरप्रयोजकः नन्वेवं सत्यौपाधिकमेव भेदमालंब्य शास्त्राणि नानाविधौतस्मार्त्तविधिनिषेधाऽधिकारः
किं न स्यादितिचेन्न भवेदेवं यदि ते षां मतान्निनाभिवोपाधितन्त्रदात्म्यसंसर्गाध्यासो यो न बाधितो स्यात्तां न त्वेवं
मतत्वेषां कारणाद्भिन्नत्वं भेदकोपाध्याद्यात्मनो न्यत्रास्ति

हेम्नः कार्यकुलत्ववहगतं हैममेवेत्ति यद्वत् क्षीरे क्षीरं समरसं तेयोपमेवां बुमध्ये ८ तया
वं सर्वं समरसतया त्वं पदं तत्पदार्थे नित्ये गुराये ३ तत्वा द्वातिसंस गर्धानोऽपः ८ संपन्नं

अथ प्यातज्ञादेन्नोनेतिनेति वाचारंभणं विकारो नामधेयमित्यादि श्रुति॰ प्रातेः कारणाद्भिन्नस्य कार्यस्य प्रति
सिद्धत्वेन मिथ्यात्वात् तत्त्वसाक्षात्कारेणाच तन्मूलमपमर्द्दि – तत्वादिति २ एवं जीवस्य तत्त्वतो विमर्शोऽपि
नायापतीताऽपेतब्रह्मत्वाद्यादिभेदानिरतिशयानंदैकरसब्रह्ममात्रैकरसत्वादपि स्वस्यानकमधिकार इति
दर्शयितुं तत्त्वमस्यादिवाक्यतात्पर्यरहस्यमप्याटयति हेम्न इति पृथ्वा हेम्नः स्वर्णस्य कार्यं कटककुंड
लग्रैवेयकांऽगुलीयकादिर्त्तवहे अग्नेर्योगं तं धमायमानं द्रवीभूतं समरसतया एकीभूतं कटककुंडलादिना
मरूपभेदं जहत् न भूयः कटककुंडलाद्यर्थ क्रियासमर्थः – किंतु हेमं सर्वं हेमत्वं वधिसामान्यस्वभावमे
वयद्भवति यथा वा क्षीरे निषिक्तं क्षीरमऽविभक्तं क्षीरसामान्यमेव भवति यथा वाम्बु बुमध्ये निषिक्तो
षि

यं जलं तोयसामान्यमेव समरसतया· ऐक्यरसेन भवति एवं सर्वं यदादि भुवनांतं सर्वं तत्पदं तत्पदवाच्यार्थ
भूतं जगत्तदनन्यत्वमारंभणशब्दादिभ्य इति सूत्रोपदर्शितसत्यपरंपरावधि परमार्थत्रैकरूप्यपरिशेषा
त्समरसतया तदेकरसतया अपरिच्छिन्नसच्चिन्मात्रात्मना प्रविलापनेन यदा तं पद्मं तदा त्वंपदं· त्वंपद
वाच्यमपि जीवरूपं तत्पदार्थे तत्पदे लक्ष्ये प्रागुक्तेन समरसतया पूर्णानंदभूतात्मनैव संपन्नं तथावि
धेयत्वरूपचिन्मात्रात्मके निःस्वे गुरौ परमात्मस्वभावे पर्यवसितं ते

शास्त्राब्धौयनसैंधवंतस्यैकत्वभवनं= ४·२

यस्मिन्विश्वं सकलभुवनं सामरस्यैकभूतम् उर्वीह्यापोनलमनिलखं जीवमेवं
क्रमेण यत्साराब्धौ समरसतया सैंधवैकत्वभूतं तन्निःस्वं गुरुमाश्रये ४

समस्तविधिनिषेधफलप्रदे पादादौ ? पगः परिशेषादपि न विधिनिषेधशास्त्राधिकार इत्यर्थः २ उक्त
मेवार्थं पुनर्दृष्टांतांतरेण विशदयन् तादृशात्मानंदस्वरूपप्रतिष्ठस्य न कर्माधिकारप्रसक्तिरित्या
ह यस्मिन्निति यस्मिन् शान्ते निःसकलं कलाभिः सावयवप्रदेशभेदैः सहितं भुवनं भूर्भुवः स्वरिति· त्रि
धा सप्तधा चतुर्दशधा वा भिन्नं ब्रह्मांडोदरकोशगर्भे दृश्यलोकजातं तथा उर्वीति पृथिवी आपः जलं अनलं न
अग्निः धीः संजीवत्वं अनिलो वायुः खं आकाशं तथा जीवतीति जीवं· स्थूलसूक्ष्मदेहद्वयमित्येवं
क्रमेणाधिलोकमधिभूतमध्यात्मं चेति· त्रिधाभिन्नं विश्वं कृत्स्नं जगत् यातीति यत् विलयं प्राप्नुव
त्सत् शास्त्राब्धौ यदिति सैन्धवमिव समरसतया एकरस्ये नैकत्वभूतमेकत्वं प्राप्तं तन्निःस्वं गुरुमाश्रये इत्या स्मिं=
दि पूर्ववत् शास्त्राब्धौ सैंधवैकत्वभूतमिति सापेक्षत्वादसमर्थत्वे सैंधवपदस्य समासमासस्पष्टार्थं दत्तः ४
उपाधीनां प्रविलयेन सामरस्ये· उपहितस्य न पृथक् विशेषोस्तीति जीवस्याखंडब्रह्मात्मतापत्तिसिद्धं
वेति न तत्र प्रागप्रदृष्टांतो दर्शितः इदानीं तत्रापि यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय

यत्संउब्रह्मात्मतायां=

१०
४ तथाविद्यानामसत्त्वादिभक्तः परात्परं पुरुषमुपैति दिव्यमिति श्रुतिसिद्धं दृष्टांतं दर्शयन्नविभेदप्रत्यक्षमयेनाद्वि
तीयब्रह्मैकरस्याद्विधिनिषेधशास्त्राधिकारप्रसक्तिरेव तस्य नास्तीत्याह यद्वदिति नद्यानदीनां सं ओ
उदधि ओदधिसमुद्रप्रदेशपर्यंतं कालभेदेन प्राप्तो समो रसो जलप्रवाहो परस्परमेलनेन सागरत्वमे
व प्राप्नोतीत्यवधारणो प्रसिद्धोयं औदाहि.

यद्वन्नद्योदधिसमरसौ सागरत्वं ह्यवाप्तौ न प्रत्यग्विलय परिगतौ सामरस्यैकरूप (तृतीयान्तन दीपादस्यात्)
ताः भेदातीतं परिलयगतं सच्चिदानंदरूपं निस्त्रैगुण्ये ५

ऽऽप्राऽऽनोति परिरूपविषये दृष्टिः स्त्रांदसी अथवा उदधिना समरस्यायं ओदधिसमरसः प्रवाहः (नदीच
ऽौदधिसमः) नदीचऽौदधिसमरसश्च नद्योदधिसमरसौ यद्वा उदधिप्राप्तौ समश्च उदधिसमः उदधिसमस्यायं औ
दधिसमः नदीच ऽौदधिसमश्च नद्योदधिसमो नद्योदधिसमयोः रसौ जलमेलनेन सागरत्वमेकरस्यं यद्वद
वाप्ताविन्यर्थः यथायं दृष्टांतस्तद्वज्जीवब्रह्माणी यतेऽस्मिन्नुपाधिमात्रमित्यालयं प्रत्यक् तयोपरिगतो उ
पाधिविलयादैक्ये सति सामरस्येन एकरूपताः अखंडस्वभावेनास्थिता अतएवेदभेदवाद्विबप्रति
बिंबभेदस्याप्युपाधिकृत्वात्मात्परिलयेन गतं यस्य तं एकं विस्मृतकंठचामीकरवदधिगतं सतत
त्वभेदातीतं सच्चिदानंदैकरूपं चात्मानं प्राप्नुयात् निस्त्रैगुण्ये त्यादि प्राग्वत् नद्योदधिसमरसाविति पाठस्तु स्प
१२:= ष्टः ५ किंच त्वंपदार्थविवेकतत्पदलक्ष्यस्य ज्ञानाभ्यासात्तावधारणात्तत्पदार्थस्य च त्वंपदलक्ष्यस्वप्रकाश प्रत्यक्ज्ञात्र स्प=
त्वावधारणात्तु भयेदेयवस्त्राणि दूरमात्रपरिपोषान्तु न विधिनिषेधप्रयत्नाप्राप्तिरित्याह दृष्ट्वेति वेदांत
न्याये न सर्वविद्यामपि विहाय महाप्रयत्नेन प्रवृत्त्यवेदनीयं परं पदं ब्रह्मत्वात्मबोधमात्रं स्वरूपं बुद्ध्यात्मात्मा

नंद्यत्वं चं च सकलवपुषामंतर्बहिस्स्यमेकमद्वितीयसन्मात्रं तद्भासेदेकरस्येन सदुदिततयास्वप्रकाशद्रूपाणि

इष्टांवेषये परमपदं स्वात्मबोधस्वरूपं बुद्धात्मानं सकलवपुषामेकमंतर्बहिस्थं
भूत्वा नित्यं सदुदिततया स्वप्रकाशस्वरूपं निस्त्रैगुराये ६

नंदस्वरूपं भूत्वा निस्त्रैगुराये ६ कार्येति कार्याकार्ये किमपि सततं नैव कर्तृत्वमस्ति जीवन्मुक्तास्थितिमवगतो
दग्धवस्त्रावभासः एवं देहे प्रविलयगते तिष्ठमानो विमुक्तो निस्त्रैगुराये ॰ ७ किंच सति कार्ये भराये तत्फले वर्त
कर्तृत्व
ध्रुणात्तदर्थप्रवृत्तौ कर्ता स्यात् न त्स्वभावश्चविधिशास्त्रेणापि क्रियेत सत्यकार्ये पापेतत्फले द्वेषात्ततो नि
वर्तमानस्तत्कर्ता तन् निषेधशास्त्राधिकारी स्यात् नेत् कार्याकार्ये किमपि तु छे एवं सति सततं सदेव प्रा
दि गिदानीमप्येव नैवकर्तृत्वमस्ति [illegible] नास्ति तर्हि जीवनार्थमिदाटनादौ न त्वोपदेशनमाध्यादौ चकथं प्र
वर्तसीति चेत तत्राह जीवन्मुक्तेति अतो हृदग्धवस्त्रं संस्कारादवस्त्राकारमिव [illegible] संस्कारादवीहरन्निवावभासे माहं
इतिदग्धवस्त्रावभासः वस्तु तस्तु जीवन्नेव मुक्तास्थितिमवगतः एवमुक्तरीत्याज्ञानाग्निदग्धत्वात् देहे
भस्मीभूतपटवत् प्रविलयगते तिष्ठमानः प्रकाशमानोप्यहं प्रकाशानस्वयास्वयोध्येत्यात्मनेपदं
वि [illegible] मुक्त एव अतो निस्त्रैगुराये त्यादिप्राग्वत् ७ किंच यावद्वविस्फुरयते तावदेवेदं नमदिवभासते वि
शे स्वं तु नाभ्यं तरस्यवाह्यस्य बाध्येतस्य स्वरूपं कदाचित्क्वचिदपि निरूपयितुं शक्यामि तिदर्शयति"
कस्मादिति कस्मात्क्वाहं किमपि च भवान्कोयमत्र प्रपंचः स्वं स्वं वेद्यं गगनसदृशं पूर्णतत्वप्रकाशं
वि आनंदाख्यंसमरसघने वाह्यमंतर्विहीने निस्त्रैगुराये ८ अहमिति परिच्छिन्नमहंकारात्मकं यदात्मस्व
अहंकारस्वरूप
रूपं भाति तत्कस्मात्कस्य कारणात्तः स्वरूपतश्च कुतो निरूपमित्यर्थः तथाहि तद्यांगतत्कस्माद्विषं वा अहंकारस्वरूप कारणात्
अगंमिवे
आद्यकस्मादुपानान्नदागतंनतावद्गुणतः चेतनात्मरूपत्वात्तमभावविरोधात् जडस्यचेतनोपादा

श्रु०
५

अहंकारस्वरूपस्य

न तद्योगात् नापि चित्तः चितेरपरिणामित्वभावत्वात्परिणामायोगात् यदि विवर्त्ततां ब्रूषे तर्हि तस्य
मिथ्यात्वमेव स्यात् नित्यत्वे कामादि परिणामविरोधः न चाकोऽहं कोयमहंकारात्मेत्यर्थः न ता
वज्जडः आत्मानुभवविरोधात् नापि चित् परिच्छेद विषयत्वानुभवविरोधात् जडदेहादिवद्व्य

६६५ ॐ ह्रीं नमः शिवाय नमः

5 भावाविरोधात् तस्मादहंकारात्मा तु वाच एवेत्यर्थः किंच भवान् त्वमपि किं अनात्मवस्त्वात्मवस्तु
वा आद्ये चेतनत्वविरोधो द्वितीये ममपरत्वानुभवविरोधः अत्र आवयोः प्रतीयमानः प्रपंचप्र
कः किं स्वतः सिद्ध उत परतः आद्ये जाड्यानुभवविरोधः आत्मवच्चिद्रूपत्वापत्तो भेदकाभावात् तराप

परतः

रिशेषादखंडस्फूर्तिचिन्मात्रैकरस्य प्रसंगश्च द्वितीये पि सप्रपंचः केन सिद्धः किं परतः स्वतो वा आ
द्ये अनवस्थापत्तिः द्वितीये स्वप्रकाशात्तस्य परसाधकत्वात् तत्संबन्धो वाच्यस्तत्संबंधः किं तादात्म्य
मुत संयोगः नाद्यः चिज्जडयोरैक्यघटिततादात्म्यायोगात् नापि द्वितीयः अक्रियायाः निरवयवा
याश्च चितः संयोगायोगात्समवायाभ्युगमे चाऽनवस्थापत्तेः २५ युतसिद्धदर्शनाच्च एवं च तत्त्वं आत्म
रूपं स्वं च त्वात्मैकनिष्ठं न ह्येतत्त्वा संनद्धपं साधयितुं शक्नोतीति वेद्यजगद्रूपं गगनसदृशं शून्यमे
वयादिति गगनमपि न शून्यमप्रमाणत्वप्रसंगात् तर्हि प्रशंसितत्व आवाधितसन्मात्रं स एव स्वात्म
प्रकाशो यस्य तथाविधमपरिच्छिन्नस्वप्रकाशचिन्मात्रमित्यर्थः तत्कृतः यतः ३ इदं वेद्यजातं कं
नं त्वातिरिक्तं वस्तु विलीने अत एव सम रसत्वे ने सैधववत्न वत् ज्ञाने करसत्वे समानंदाख्येऽत्र वा
संवहिरनवस्थितं अतस्तस्मात् स निर्विकल्पायेनित्यमात्मेकस्वभावे पायिविचरतो ममत्वान्यपस्यवा

सर्वथा त्रविधिनिषेधप्रवृत्तिकनीधिकारः केनापि संपादयितुं शक्य इति पूर्ववत् ८ इदानीं सर्वोपकाराय स्तोत्रपदि
शाष्टकाभ्यासस्यापि महाफलतां प्रदर्शनमुखेन तदर्थानुसंधानस्य मोक्षफलतां दर्शयति सत्यमिति सत्यंस
त्यं परमममृतं सर्वकल्याणरूपं मायारण्यदहन मलिने शांतिनिर्वाणदीपं॰ तेजोरूपं निगमसद
नं व्यासपुत्राष्टकं यः प्रातःकाले पठति मनसा याति निर्वाणमार्गे ९ इदं व्यासपुत्रस्य वाक्यामृत
रूपमष्टकमेव परमामृतं साधनत्वात्परममृतं सर्वेषां प्राणिनां कल्याणरूपं अ[illegible]त्मिका
दिता पत्र मदहनैः सदादस्यमानविमोहध्वांतविहितत्वान्मलिने जगन्मायालक्षणेरण्ये मौर्यां
ध्वांतस्य तापत्रयाऽनलानां च शांत्या प्रशमने निर्वाणस्य मोक्षस्वरूपस्य प्रकाशकत्वाद्दीपभूतं वि
गमा वेदांताः सदनं प्रकाश्यं गृहं यस्य तत्[illegible] विधं यत्तेजः प्रभास्वानीयोर्य प्रकाशस्तद्रूपयति
संपादयतीति तद्रूपं ईदृशं व्यासपुत्राष्टकमिदं यः [illegible]कृषः अर्थानुसंधानपरः समनसा प्रातःका
ले पठति स तस्यानुग्रहात् क्रमात्ज्ञानं प्राप्य निर्दुष्टे गुणाय प्रागुक्त निर्वाणमार्गेव स्वयं पातिमु
च्यत इत्यर्थः ९ श्रीमच्छुकाष्टकस्येयं व्याख्या वृत्तिसरोरुहं भानुप्रभेवनं प्रबोधयतु सन्मतेः
१॰ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्रामचंद्रसरस्वती पूज्यपादशिष्यगंगाधरेंद्र
सरस्वत्याख्यभिक्षुणा कृतं शुकाष्टकव्याख्यानं संपूर्णं शुभंभवतु ॐ गुरुचरणकमले
भ्यो नमः संवत् १९८८ चैत्र शुक्ल पक्षे चतुर्थ्यां चंद्रवासरे प्र॰१॰ लिपिकृतं पुरोहित सा
धुरामशर्मा जेन श्रीगुरुभ्यो नमः ॐ शिवरामायनमः शुभमस्तु शांतिरस्तु श्र॰

6

६

नं०
३२

6